# केन्द्रीयसंस्कृतविश्वविद्यालयः
# गुरुवायूर परिसरः
# पुरनाट्टुकरा,तृश्शूर्

## शिक्षाशास्त्रविभागीयद्विदिवसीयसंगोष्ठ्याः प्रतिवेदनम्

केन्द्रीयसंस्कृतविश्वविद्यालयस्य गुरुवायूर्-परिसरस्य शिक्षाशास्त्राविभागेन 16/05/2022 तथा 17/05/2022 दिनाङ्कयोः **एकविंशतिशताब्द्यां संस्कृतशिक्षा – प्रत्याह्वानानि सम्भावनाश्च** (Sanskrit Education in 21st century : Challenges and possibilities) इति विषयमादाय द्विदिवसीया राष्ट्रिया सङ्गोष्ठी अनुष्ठिता । अस्यां सङ्गोष्ठ्यां भारतस्य पञ्चोत्तरराज्येभ्यः संस्कृतक्षेत्रे विद्यमानाः संस्कृतशिक्षाविद्वांसः समागताः । तत्र आचार्यः एम्. वि. नटेशन् महोदयः , आचार्यः चन्द्रकान्तमहोदयः, आचार्यः ई. एम्. राजन् महोदयः, आचार्यः रामचन्द्रुलबालाजीमहोदयः च विशिष्टवक्तृत्वेन विविधसत्रेषु स्वीयान् विचारान् प्रास्ताविषुः ।

विभागीयच्छात्रैः कार्यक्रमस्य उद्घाटनसमारोहे 16/05/2022 वैदिकलौकिकमङ्गलाचरणपुरस्सरं कार्यक्रमस्य आरम्भः कृतः । उद्घाटनसमारोहे आचार्य्येण एम्. वि. नटेशन् वर्य्येण कुञ्चिकाभाषणं तथा कर्णाटकस्थात् केन्द्रीयसंस्कृतविश्वविद्यालयस्य राजीवगान्धीपरिसरात् आगतेन आचार्य्येण चन्द्रकान्तवर्य्येण विशिष्टं व्याख्यानं व्यधायि । अत्र अतिथिनां स्वागतं प्रो. के.के. हर्षकुमारमहोदयेन तथा च कार्तज्ञं प्रो. के.के. शैनमहोदयेन कृतम् । अस्मिन् सत्रे आचार्येण प्रो. ई. एम्. राजन् वर्य्येण आध्यक्षपदमलङ्कृत्य आध्यक्षीयभाषणं विहितं सहैव सभासञ्चालनं विभागीयेन अध्यापकेन ललितमोहनपन्तोलामहोदयेन अकारि ।

सङ्गोष्ठ्याम् अस्यां विभिन्नेषु सत्रेषु विभिन्नैः विद्वद्भिः स्वीयाः विचाराः प्रस्तुताः । तत्र केन्द्रीयसंस्कृतविश्वविद्यालयस्य राजीवगान्धीपरिसरात् डा. वेंकटरमणभट्टमहोदयः, राष्ट्रियसंस्कृतविश्विद्यालयात् तिरुपतेः डा. एम्. दत्तात्रेयशर्ममहोदयः, राष्ट्रियसंस्कृतविश्विद्यालयात् तिरुपतेः डा. ए. सच्चिदानन्दमूर्तिमहोदयः संसाधकत्वेन (रिसोर्स पर्सन्) समागमन् ।

17/05/2022 दिनाङ्के प्रातः 10 वादनतः सत्रस्यारम्भः जातः । अस्मिन् दिने परिसरीयच्छात्रैः तत्रापि विशिष्य शोधच्छात्रैः विभागीयच्छात्रैश्च सङ्गोष्ठ्यां भागः ग्रहीतः । आहत्य अस्यां सङ्गोष्ठ्याम् एकनवतिजनाः पत्रप्रस्तुतिम् अकार्षुः ।

17/05/2022 दिनाङ्के अन्तिमसत्रं समापनसत्रत्वेन 03: 30 अपराह्णे आरब्धम् । समापनसमारोहे केन्द्रीयसंस्कृतविश्वविद्यालयस्य राजीवगान्धीपरिसरस्य शिक्षाशास्त्रविभागस्य आचार्यः रामचन्द्रुलबालाजीमहोदयः मुख्यातिथिः आसीत् । संस्कृतभारतीति सङ्घटनस्य अखिलभारतसम्पर्कप्रमुखः विश्वविभागसंयोजकश्च वाचस्पतिः प. नन्दकुमारः महोदयः सारस्वतातिथिः आसीत् । कार्यक्रमस्य अध्यक्षः परिसरनिदेशकः आचार्यः ई. एम्. राजन् महोदयः

आसीत् । डा. सि. श्यामराजः महोदयः समापनसत्रस्य सञ्चालकः आसीत् । अस्मिन् समापनकार्यक्रमे अतिथिनां स्वागतं डा. डि. वेणुगोपालमहोदयेन तथा च कार्तज्ञं कार्यक्रमस्य संयोजकेन डा. के. गिरिधररावमहोदयेन कृतम् । कार्यक्रमे मुख्यातिथिना आचार्य्येण रामचन्द्रुलबालाजीमहोदयेन उक्तं यत् एकविंशतिशताब्द्यां संस्कृतशिक्षायाः सम्भावना सकले विश्वे वर्त्तन्ते, सहैव विश्वं भारतं प्रति पश्यति इति । एतदर्थं शताब्द्यामस्याम् अस्माभिः संस्कृतबान्धवैः तत्परेण भाव्यम् इति । संस्कृतभारतीति सङ्घटनस्य अखिलभारतसम्पर्कप्रमुखः विश्वविभागसंयोजकश्च वाचस्पतिः प. नन्दकुमारमहोदयेन सारस्वतातिथिना विश्वे संस्कृतस्य स्थितिः, भारते संस्कृतस्य स्थितिः, संस्कृतस्य प्रत्याह्वानानि, संस्कृतज्ञानां दायित्वानि कर्तव्यं प्रति च दिग्दर्शनं प्रदत्तम् । अन्ते सञ्चालकेन डा. सि. श्यामराजमहोदयेन शान्तिमन्त्रेण कार्यक्रमस्य समापनं कृतम् ।

**<u>उद्घाटनसत्रस्य दीपप्रज्वालनम्</u>**





**आचार्याणां विशिष्टातिथीनां भाषणम्**







## समापनसमारोहकार्यक्रमः





## शिक्षाशास्त्रीद्वितीयवर्षीयच्छात्राणाम् समूहचित्रम्



संयोजकः

डा.के.गिरिधर रावः

विभागाध्यक्षः

प्रो.के.के.षैन्